Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

மாத இதழ்
விலை ரூ. 4
AUGUST 2015

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

ஸம்ஸ்க்ருதஸ்ரீ:

Samskritasri
A Monthly Journal of
Samskrit Education Society
ஸம்ஸ்க்ருதஸ்ரீ கல்விக் கழகம்
மாத இதழ்
212/13-1 செயிண்ட் மேரிஸ் ரோடு
மந்தைவெளி சென்னை-28

जयन्ति श्रीजयेन्द्राः सततं श्रीविजयानुगताः ।
शिष्याणां जयवर्धकाः शताभिषेके महे हृष्टाः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஓ (24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd) CHENNAI

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

President : Vaidya Sri S.V. Radhakrishna Sastri

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.

Editor and Publisher : S. SRINIVASA SARMA
Samskritasri
34, Senthamil Nagar,
Near : Indra Nagar & New Railway Station
Big Kancheepuram - 631 502
Cell : 90941 53190

பாடங்கள் நடத்துபவர்கள் :

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன்,	ஆழ்வார்ப்பேட்டை	2435[illegible]7
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம்,	மேடவாக்கம்	9884158[illegible]
3.	ஸ்ரீமதி சாந்தி அசோக்	மந்தைவெளி	2495140[illegible]
4.	ஸ்ரீமதி கௌரீ கருணாகரன்,	மைலாப்பூர்	2432054[illegible]
5.	ஸ்ரீமதி ரமாசுந்தரராஜன்,	சென்னை-95	65687635
6.	ஸ்ரீமதீ பார்வதீ ராமசந்திரன்	அண்ணா நகர்	26215719
7.	ஸ்ரீ R. முத்து கிருஷ்ணன்	கொரட்டூர்	26872430
8.	ஸ்ரீ S. ரங்கநாத சர்மா,	சேலையூர்	22291720
9.	ஸ்ரீமதி புவனேச்வரீ	ராஜகீழ்பாக்கம்	9841212047
10.	ஸ்ரீ K. ராஜேச்வரீ	மாடம்பாக்கம்	9962837319
11.	ஸ்ரீ S. ஹரிஹரன்	நங்கைநல்லூர்	9841403859
12.	ஸ்ரீ S. அனந்தன்	மதுராந்தகம்	9894709418
13.	ஸ்ரீ P.R. சுப்ரமண்யம்	K.K. நகர்	23640864
14.	ஸ்ரீ N. ஜானகீ ராமசாஸ்த்ரீ	I.T.I. கிண்டி	24953144
15.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய	ஸ்ரீரங்கம்	2430632
16.	ஸ்ரீமதீ ராஜம் சுந்தர்	திருநெல்வேலி	9488326850
17.	ஸ்ரீ T.V. ஸ்ரீநிவாஸ தாதாசார்ய	காஞ்சீபுரம்	27269153
18.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன்,	திருநின்றவூர்	9445703470
19.	ஸ்ரீ R. ரங்கநாதன்	காஞ்சீபுரம்	97910 55428
20.	ஸ்ரீ C.A. ஏகாம்பரம்	கோயம்புத்தூர்	0422-2233242
21.	ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,		0487-2382964
22.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், மும்பை (E)		09757115154
23.	ஸ்ரீ V. கோதண்டராமன், Mrs. கீதா ரேகா, ஆதம்பாக்கம், சென்னை		9444469638

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला: : 37 AUGUSTL-2015 पुष्पम् 10

कलि : 5109 मन्मथ -सिंहमासे 37—10

१. काञ्चीजगद्गुरुः विजयते ! ४
२. एक चक्रम् । ५
३. श्रीमहालिङ्गस्तोत्रम् । १०
४. रैवतकं वर्णयति माघः । १२
५. शब्दविमर्शः - १८
६. श्री शिवोत्कर्षमञ्जरीटीका - घट्टार्थबोधनाम्नी । २१
८. करुणामृतम् - गुरुवायुपुरेशवैभवम् ।२५
९.श्रीमत्परशुरामायणम् । २७
१०. मुक्तकमौक्तिकानि । ३०
११. अरविन्दोपनिषद् । ३३
१२. आषाढ-महिमा । ३८

The Samskrit Education Society Established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:

Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.

PRESENT ACTIVITIES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
S.V. RADHAKRISHNA SASTRI,
Hon. Editor.
Dr. N. VEEZHINATHAN
Editor and Publisher
Dr. S. SRINIVASA SARMA

Hon. Academic Advisors :
Dr. K. SRINIVASAN,
Vivekananda College, Chennai
Dr.N.V. Devi Prasad
Madras Sanskrit College,
Smt. Santa Srinivasan
SES, Chennai

Associate Editors :
Pandit S. Ranganatha Sarma, Chennai
Prof. G. Srinivasu, Kanchipuram
Prof. C.V. Seshadri, Chidambaram

SUBSCRIPTION RATES

ANNUAL :	Rs. 40/-
LIFE SUBSCRIPTION	Rs. 400/-
Page Donation	Rs. 200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer,

"DD/Cheque should be sent by Speed Post only"

The Samskrit Education Society (Regd.) .
Old 212/13-1, St.Mary's Road, Mandaiveli,
Chennai - 600 028. Ph: **044-2495 14 02**
www.samskrithasri.gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

काश्रीजगद्गुरुः विजयते !

वाणी प्रसादमधुरा हृदयं सदयं सुधामयी वीक्षा ।
हस्तौ वितरणचतुरौ प्रणमद्धितचिन्तकस्य गुरोः ।।

वर्षिष्ठो वपुषा, प्रेम्णा यविष्ठो, दयया लघुः ।
गुरुर्लोकर्हितासक्त्या, विचित्राचरितो गुरुः ।।

तैलबिन्दुर्जल इव यस्य धीर्विश्वगाहिनी ।
विवित्सया तलगता स चोदयति नो धियः ।।

वदनं प्रसादसदनं सदयं हृदयं, सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वन्द्याः ! ।।

जयन्ति श्रीजयेन्द्राः सततं श्रीविजयानुगताः ।
शिष्याणां जयवर्धकाः शताभिषेके महे हृष्टाः ।।

ननु देवानां यदि शरीरवत्त्वमङ्गीकृत्य ब्रह्मविद्यायां अधिकारः उच्यते तर्हि यज्ञादिकर्मणि विरोधो भवेत् इति आशङ्क्य समधत्ते–

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् (ब्र.सू. १.३.२७) कर्मणि अनेकमनुष्यैः क्रियमाणे अनेकत्र यज्ञे इन्द्रादिदेवानां शरीरवत्त्वे युगपत् संनिधानासंभवात् विरोधः = कर्मविरोधः आपद्येत इति चेन्न; कुतः ! अनेकप्रतिपत्तेः - एकस्य इन्द्रस्य बहूनां देहानां युगपत् प्राप्तेः दर्शनात् 'स एकधा भवति त्रिधा भवति (छा. ७.२६.२) इत्यादि श्रुतौ दृष्टत्वात् । अथवा अनेकप्रतिपत्तेः = अनेकत्र कर्मणि एकस्य देवस्य प्रतिपत्तिः अङ्गभावः तस्य दर्शनात् । यथा लोके अनेकैः नमस्कर्तृभिः एकः सन्मनुष्यो नमस्क्रियमाणो दृश्यते तद्वत् ।। (१३२)

—श्री श्रीजयेन्द्रस्वामिनः गुरुप्रिया-ब्रह्मसूत्रवृत्तिः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एक चक्रम् ।

-विद्वान् नडहल्ली, रङ्गनाथशर्मा

(ततः प्रविशति कुन्ती)

कुन्ती — (आकर्ण्य) अये ! किन्नु खलु प्रतिवेशिगृहे रोदनध्वनिरिव श्रूयते । अङ्ग ! पश्यामि ।

(ततः प्रविशति ब्राह्मणः, ब्राह्मणी, कन्यका च । त्रयोऽपि संविग्नाः । बालकश्च क्रीडन् प्रविश्य पितराववलोकयति ।

ब्राह्मणः — (सविषादम्) धिक् संसारम् । नास्त्यत्र सुखलेशः । जन्मप्रभृति धर्मे श्रद्धालुना श्रान्तं मया । न स्मरामि जातुचित् धर्मे मम स्खलितम् । कोऽयं धर्मो न रक्षति? यमाश्रित्य महापङ्कइव गजः सीदामि । मोक्षस्तु नभसः पृष्ठे । (सविमर्शम्) अर्थकामावेव पुरुषार्थौ यदि राजा सम्यक् पालयति । 'राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्' इत्यस्ति नीतिविदां वचनम् । मया तु विपर्यासितम् । ब्राह्मणि, न त्वया मम वचनं श्रुतं येनेयं विपत्तिः शिरसि निपतिता ।

ब्राह्मणी — आर्य, जानासि मे त्वयि भक्तिम् । किं वा दुरनुष्ठितं मया?

ब्राह्मणः — स्मरसि यन्मया नगरादन्यत्र गन्तुं व्यवसितम्? दुर्बलो दुर्मेधाश्चास्य नगरस्य राजा । अत्र निवासो नास्माकं क्षेमङ्क इत्यसकृदुक्तं मया । त्वया तु नानुमोदितं, न विमृष्टम् । 'इह जाता विवृद्धास्मि मातापितरौ चात्र

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

निवसतः' इत्युक्तवती त्वम् । अदूरदर्शिनी खल्वसि । अधुना तु—

स्वर्गतस्ते पिता वृद्धो माता चानुगता पतिम् ।
बान्धवा भूतपूर्वाश्च का तवात्र पुरे रतिः ।। १

ब्राह्मणी — आर्य, अनुत्तरास्मि । (अश्रूणि मुञ्चति)

ब्राह्मणी — साध्वि, शोकनिर्विण्णेन किमपि मया जल्पितम् । मा भूद्विषादः । सर्वदा हि त्वम्—

सुशीला सत्त्वसम्पन्ना सहधर्मचरी मम ।
सखी चापत्यजननी मातेव शुभकाङ्क्षिणी ।। २

पश्य, का गतिरिदानीम्? यद्यहं बकासुरस्य भक्ष्यो भविष्यामि को नु त्वां पुत्रौ च पालयिष्यति? वृष्टिवाताहतं जीर्णकुड्यमिव शीर्यते कुटुम्बकमिदम् । न चैकाकिनी शक्नोषि धुरं वोढुम् । न खल्वेकचक्रो रथो गच्छति ।

ब्राह्मणी — आर्य, अलं चिन्तया । अहमेव यास्यामि राक्षसनिकटम्।

अयं हि परमो धर्मो नारीणां सम्प्रकीर्तितः ।
प्राणानपि परित्यज्य यद्भर्तुर्हितरक्षणम् ।। ३

ब्राह्मणः — (सकरुणम्) भद्रे, मैवं वोचः ।

कुमारं कन्यकाश्चैव प्रसूय कुलतारिणीम् ।
दैत्याय चेद् बलिं दद्यां धिङ्मे कृपणजीवितम् ।। ४

ममैव जीवितस्यार्थे पत्नीं कल्याणिनीं सतीम् ।
किं नु जह्यां सुखापेक्षी मतिहीनस्त्रयीमिव ।। ५

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कष्टं भोः कष्टम् ! ।

ब्राह्मणी — आर्य, स्त्रीति मन्यमानः सानुकम्पो भूत्वा स दैत्यो मां विसृजेदपि ।

ब्राह्मणः — सौम्ये, न हि व्याघ्रो हरिणीमनुकम्पमानो दृष्टः ।

कन्यका — अम्ब, श्रूयतां मम वचनम् । तातेन विनाकृता त्वं सत्यं प्राणान् न धारयिष्यसि । युवाभ्यां विहीनाऽहं नैव जीवितुं शक्ष्यामि । सत्येवं कुतो नु जीवितशङ्क ममानुजे बालके ? धर्मतोऽहं कदाचित् परित्याज्यैव । 'अर्थो हि कन्या परकीय एव' । तात, अधुनैव मां परित्यज्य कुलं त्रायस्व । यास्यामि राक्षसमुखकुहरम् ।

(उभौ कन्यकां परिष्वज्य)

ब्राह्मणः — मैवं मैवं पुत्रिके,

नैव श्येनाय दास्यामि प्रियां गृहशकुन्तिकाम् ।

ब्राह्मणी — वत्से,

कथङ्करमिदं श्रुत्वा हृदयं मे न दीर्यते ।। ६

(सर्वे रुदन्ति)

बालकः — (वेत्रलतामादाय) तात, मा रुदः । अम्ब, मा रुदः । अक्क, मा रुदः । अनेन दण्डेन तं राक्षसं हनिष्यामि ।

(सर्वे बाष्पाणि मार्जयन्तः स्यममानाः बालकमालिङ्गन्ति ।

(ततः प्रविशति कुन्ती)

कुन्ती — पूजनीय, तपोधन, कुतोमूलमिदं दुःखम्? तत्त्वतो

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ज्ञातुमिच्छामि । ज्ञात्वा च प्रतिकर्तुं यतिष्ये यदि प्रभविष्यामि ।

ब्राह्मणः — तपोधने, उपपन्नमेतत् सतां यदन्यदुःसंवेदनम् । इदं दुःखं मानुषेण व्यपोहितुं न शक्यम् ।

कुन्ती — विश्रदय विप्रोत्तम, यदि वाचि न मत्सरः ।

ब्राह्मणः — हन्त ! वराकस्य मे भागधेयम् । गव्यूतिमात्रे नगात् बको नाम नरभक्षको राक्षसः प्रतिवसति । वैदेशिकी भवतीति ब्रवीमि । अस्य पुरस्य राजा मन्दधीर्दुर्बलश्च । राक्षसवैयात्यभीतेन राज्ञा तस्मै प्रतिश्रुतम्—प्रतिदिनमाहारं प्रेषयिष्यामीति । शकटपूर्णं मृष्टान्नं, वृषभौ द्वौ, मानुषश्चैक इति दैत्यस्य भोजनकथा । इदं च बकासुरस्य दैनिकं बलिहरणं प्रतिदिनं पौरैः पर्यायतो देयमिति राजनियोगः । स च वारः श्वः प्रभाते ममापतितः । तदेवं दुःखार्णवे मग्नं मम कुटुम्बकम् ।

कुन्ती — किमध्यवसितं भवता?

ब्राह्मणी — किमन्यत्? प्रभाते सपुत्रदारः प्रविशामि राक्षसकुक्षिम् ।

कुन्ती — (सविमर्शम्) न विषादस्त्वया कार्यः । सन्ति मे पञ्च पुत्राः । तेष्वन्यतमं तत्वदर्थे प्रेषयिष्यामि ।

ब्राह्मणः — (कर्णौ पिधाय) नैवं नैवं तपोधने । नश्वरस्य मम जीवितस्यार्थे किमतिथिं ब्राह्मणं प्रापैर्वियोजयिष्यामि?

आगतस्य गृहे घातो नृशंसो लोकगर्हितः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रेयान्सदारपुत्रस्य विनाशोऽद्य मम स्वयम् ।। ६
सर्वथा नानुमन्ये तवाभिसन्धिम् ।

कुन्ती — ब्रह्मन्, अवहितमनाः शृणु ।

ब्राह्मणी — विरम विरम । न दृष्टा तादृशी सीमन्तिनी लोके या दुष्टमपि पुत्रं परित्यजेत् ।

कुन्ती — श्रूयताम् । नास्ति मे कश्चिदनिष्टः पुत्रः । न च कोऽपि धर्मपथाच्चलितः । न च त्यजेयमेकमपि, यदि पुत्रशतं भवेत् । अस्ति मे पुत्रो मन्त्रसिद्धस्तेजस्वी वीर्यवान् । बहुधा तस्य मन्त्रवीर्यं परीक्षितम् । बलवन्तो महाकाया राक्षसास्तेन निहताः मया दुष्टपूर्वाः । स ते राक्षसबलिं तस्मै नेष्यति निहनिष्यति च तं दुरात्मानं निश्चयेन । विश्वसिहि ।

ब्राह्मणः — महामातः !

न मानुषी वदत्येवं देवता प्रतिभासि मे ।
स्थाने मया तपस्तप्तं येनेदानीं प्रसीदसि ।। ७

कुन्ती — रहस्यमेतत् । न कदाचन कस्मैचिदप्याख्यातव्यम् । राक्षसं निहतं श्रुत्वा मन्त्रार्थिनो जनाः पुनः मम पुत्रान् स्वार्थाय विप्रकुर्युः । अननुज्ञाता हि गुरुणा मन्त्रविद्या परस्मै न कदाचिदुपदेष्टव्या भवति । सर्वथा गोपनीयमेतत् ।

ब्राह्मणः — मम देवते, अनुगृहीतोऽस्मि । सत्यं महात्मनां वचनं 'धर्मो रक्षति रक्षितः' ।

इति द्वितीयोऽङ्कः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीमहालिङ्गस्तोत्रम् ।

—शिमिषि श्रीगोपालवाजपेयिभिः कृतम् ।

ब्रह्मादिदेवैरभिवन्दिताय वसिष्ठभृग्वादिभिरर्चिताय ।
पाण्ड्यादिभूपैरभिपूजिताय मध्यार्जुनेशाय नमश्शिवाय ।। १

ज्योतिर्महालिङ्गमहाद्भुताय मूकाम्बिकानाथतपःप्रियाय ।
बृहत्कुचाम्बासहिताय तुभ्यं मध्यार्जुनेशाय नमश्शिवाय ।। २

द्विजन्महत्यादिविमोचकाय कृत्यादिकष्टौघविनाशकाय ।
भक्तेष्टदात्रे भवभीतिहन्त्रे मध्यार्जुनेशाय नमश्शिवाय ।। ३

वेदान्तवेद्याय वरप्रदाय त्रिलोचनायातिसुमङ्गलाय ।
वन्दारुतापत्रयनाशकाय मध्यार्जुनेशाय नमश्शिवाय ।। ४

शिवस्वरूपाय शिवङ्कराय शिवप्रदायाश्रितवत्सलाय ।
आत्मस्वरूपाय सदाशिवाय मध्यार्जुनेशाय नमश्शिवाय ।। ५

श्रीकालकण्ठाय महेश्वराय रुद्राक्षभस्माद्यभिशोभिताय ।
लिङ्गस्वरूपाय सहस्रनाम्ने मध्यार्जुनेशाय नमश्शिवाय ।। ६

ज्ञानस्वरूपाय कलामयाय योगीश्वरध्येयपदाम्बुजाय ।
सुपुत्रपौत्रादिवसुप्रदाय मध्यार्जुनेशाय नमःशिवाय ।। ७

पुष्योत्सवायातसुभक्तलोकबृन्दाय दात्रे सकलां समृद्धिम् ।
आयुष्यमारोग्यममेयमेधां मध्यार्जुनेशाय नमःशिवाय ।। ८

नैरोग्यभाग्यं चिरजीविकां च सुपुत्रपौत्रान् धनधान्यसम्पदः ।
त्वत्पादपद्मे चिरभक्तियोगं ज्ञानं च सायुज्यपदं प्रदेहि ।। ९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीवेङ्कटार्याः गुरुवर्यभक्ताः सायुज्यमापुस्तव सेवयेह ।
कारुण्यमूर्तिः करुणाम्बुधिस्त्वं ममापि सायुज्यपदं विधेहि ।।

त्वदीयकारुण्यकटाक्षलेशात् सम्प्राप्तमानुष्यजनिर्जनोऽयम् ।
अतस्त्वदीये चरणाब्जयुग्मे भक्तिं स्थिरां देहि महेश! मह्यम् ।।

अयं दानकालस्त्वहं दानपात्रं
भवानेव दाता त्वदन्यं न याचे ।
भवद्भक्तिमेव स्थिरां देहि मह्यं
कृपाशील शम्भो कृतार्थो भवामि ।।

अज्ञानयोगात् अपचारकर्म यत्पूर्वमद्यापि कृतं मया ते ।
तदेव सोढ्वा सकलं दयालो! पितेव पुत्रान् प्रति नो जुषस्व ।।

ज्योतिर्मय महालिङ्ग महालिङ्ग दयानिधे ! ।
भवानेव भवानेव भवानेव गतिर्मम ।।

याते रुद्र ! शिवा तनूरघोरापापकाशिनी ।
तया न स्तनुवा शन्तमयाऽभिचाकशीहि ।।

ஹே ருத்ரதேவ ! கைலாயத்தில் இருந்து கொண்டு உலகத்திற்கு மங்களமளிப்பவரே ! மங்களகரமாயும், கோரமில்லாததாயும், புண்யத்தை அருள்வதாயுமிருக்கிற தங்களது மூர்த்தியால் எங்களுக்கு க்ருபை செய்ய வேணுமே !

--தை.ஸம்ஹிதை, ஸ்ரீ ருத்ர ப்ரஸ்நம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रैवतकं वर्णयति माघः । (अनुवर्तते)

—श्रीमती Dr. सुजातराघवः SCSVMV, काञ्चीपुरम् ।

'अल्पीयान् अयं कश्चित् पर्वतः रैवतको नाम, कियद्वर्ण्यते' इति उत्साहभङ्गो माऽस्तु । महामेरुतुल्योऽयम्, यतस्समीपे द्वारकानिवासिनः श्रीकृष्णस्य सन्तोषाय देवाः सुमेरुभृङ्गाण्यानीय वर्धितो नाम्ना महिम्ना च । पूर्वतोऽपि औन्नत्यं सौन्दर्यं च तस्य प्रौढकवीनपि 'वर्ण्यताम् वर्ण्यताम्' इति प्रचोदयतीव । माघः वर्णयति सर्गेणैकेन ! ।

पश्यन्तु, अत्युन्नतोऽयं पर्वतः सूर्यस्यासन्नः ।अत एवायं दुस्सहं तापं वहति, तथाप्यरविन्दान्यपि बहुलतया वहति सरसीषु । अतस्तापः अपनुद्यते इति मात्रं न, तत्रत्यभृङ्गावलीनां यावत्तृप्ति मकरान्दपानलाभेन सौख्यवासः सिद्ध्यति । आविन्दाकरविहारात् तापं न भजन्त एव ते । इतोऽपि सौरव्यवासः कुत्र ललभ्येतान्यत्र । माघकविरपि स्वयं मधुकरतां स्वीकुर्यात्; मन्ये, अन्यानपि, यदि शक्यते प्रचोदयेत् तत्र मधुकरता प्राप्तव्येति । शृण्वन्तु पद्यमिदम्—

अखिद्यतासन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने ।
भृङ्गावलिर्यस्य तटे निपीतरसानमत्तामरसा न मत्ता ।।

सर्वेषां वाससौख्यं अस्मिन्पर्वते संरक्ष्यते इतीदं सत्यवृत्तं स्वतोऽनु भूयते सुरस्त्रीभिरपि । अत एव ताः राक्षसानामनभिभूततया स्वैरमत्रागत्य वसन्ति स्वर्गं विहाय । यतः स्वर्गे किल असकृद्राक्ष-सबाधा सञ्जायते । किमन्यदपेक्षणीयम् स्वैरसौख्यवासादृते? पद्मपङ्क्तिषु क्रीडन्ति भृङ्गा यथेच्छमित्युक्तमेव । तदतिरिच्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बहवस्तरवः तत्रोत्पन्ना वासारुचिजनकं उष्णं मुष्णन्त्येव । ततश्च स्वाधीनसञ्चारा स्वःस्त्रियः कान्तालकान्ताः, राक्षसैः कृत (क्रियमाण) क्षोभलेशस्याप्यभावात् वाससुखमनुभवन्ति तत्र । सत्यापयति पद्यमिदम्—

राजीवराजीवशलोलभृङ्गं मृष्णन्तमुष्णं ततिभिस्तरूणाम् ।
कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम् ।।

'अन्यत्र पश्यतु' इति दारुकः (सारथिः) श्रीकृष्णं सम्बोध्य पर्वतं वर्णयति-स्वर्णायमानं तटमग्निवत् भाति, श्मास्तरवः धूमवत् भान्ति । वर्णेनाग्नेः समाने तटे कुसुमसमूहः प्रसृतः सौवर्णवर्णः भाति । तत्र लीना अलीनामावलिस्तु तरून् श्यामीकुर्वन्ति, अत एव ते तरवः 'अग्नेरुद्भूतोऽयं धूम एव' इति भ्रान्तिमुत्पादयन्ति । 'दृश्यं रमणीयमेव' न केवलं श्रीकृष्णमपि तु अस्मानपि सावष्टम्भं सम्मोहयन्ति-पद्यं तावत्—

धूमाकारं दधति पुरःसौवर्णे
वर्णेनाग्नेः सदृशि तटे पश्यामी ।
श्यामीभूताःकुसुमसमूहेऽलीनां
लीनामालीमिह तरवो बिभ्राणाः ।।

इदमपरं वैशिष्ट्यं पर्वतस्य पश्यन्तु — 'एष शैलः केवलं प्रस्तरप्रायः इति न । श्रेष्ठब्राह्मणः मन्त्रगणमिव निधिगणमात्मनि बिभर्ति । मन्त्रगणानामर्थं विजानन्तः आगमपरा विवृण्वन्त्येव तथापि तेषु 'इदमित्थमिति' निश्चयात्मिका बुद्धिः न सर्वेषां भवति । तादृशं गूढार्थं मन्त्रगणं दुःखध्वंससमर्थं यथा ब्राह्मणोत्तमः लक्षावृत्या स्वात्मनि बिभर्ति

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एवमेष शैलः 'इह निधिरस्ति' इत्याप्तमुखात् आकर्ण्यापि यत् दुर्ग्रहमेव भवति निधिस्थानं, तत् बिभर्ति । सावधानं दृश्यताम्—

विद्वद्भिरागमपरै र्विवृतं कथंचित्
श्रुत्वाऽपि दुर्ग्रहमनिश्चितधीभिरन्यैः ।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं
गूढार्थमेष निधिमन्त्रगणं बिभर्ति ।।

अपारे काव्यसंसारे कविरेव प्रजापतिः । यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते इत्यस्ति वृद्धवचनम् । तदनुसृत्य लोके यद्यथा वर्तते तदेव अन्यथा परिवर्त्य सर्वजनैरभिभनन्दनीयतया 'एवमिदमि'ति कल्पनासामर्थ्यं कवेः प्रशस्यते । हेतूत्प्रेक्षा कविकल्पिता सावधानं दृश्यताम् । अतिनिबिडतया सङ्कीर्णाः कीचकाः रैवतके वर्तन्ते यथाऽन्यशैलेषु । उत्प्लुतिगत्या धावन्तश्चमरीमृगाः अकाण्डे तेषु कीचकेषु स्खलितस्य एकवालस्य (चमर्यःवालप्रियाः) विच्छेदो मा भूत् इति कातरतया ततश्चलितुं नोत्सहन्ते । इदमेव वस्तुतः कारणम् । कविरुत्प्रेक्षते — मृदुमन्दपवनपूर्णकीचकरन्ध्र भागात् कश्चन मधुरस्वन उदेति । तत्र श्रुतिसुखं मधुरस्वनं एकवारं, द्विवारं, बहुवारं अनुभूतवत्यश्चमर्यः मुग्धास्तत्रैव तिष्ठन्ति, न ततश्चलितुमुत्सहन्ते । इत्थं च स्वनमाधुर्यमेव चलनोत्साहाभावस्य हेतुः' — इति स्वरसतया उत्प्रेक्षते कविः । चमर्यः श्रुतिसुखमधुरस्वनमुग्धा इत्यपि स्वरसमेव कारणम् । पद्यं श्रूयताम्—

सङ्कीर्णकीचकवनस्खलितैकवाल
विच्छेदकातरधियश्चलितुं चमर्यः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अस्मिन् मृदुश्वसनगर्भतदीयरन्ध्र-
निर्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ।।

माघकविः विपश्चिदपश्चिमः वाच्यावाच्यं विविच्य 'इदमन्यत्र अन्यदा वक्ष्यामीति' सावधानं प्रयतते वाचं नियन्तुम् । तथाऽपि, किंचित् सहसा असहमान इव रसिकः— 'सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता । यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः' — इति भवभूतिरिव कण्ठगतं, विवरीतुं न विलम्बते । तथाऽपि सभ्यतां रक्षत्येव । उदाहरणतया इदं पश्यन्तु — 'वयं कर्म कुर्मः । तत् कर्म बहुयत्नसाध्यमपि कुत्रचित् स्थलमाहात्स्यात् अतिसुलभतया शीघ्रसाध्यतां प्रतिपद्यतेऽपि । ग्रामीणानां सुलभसाध्यं यत् तत् नागरिकाणां महाप्रयाससाध्यमिति इदानीन्तनानामप्यनुभवः । स्थलमाहात्म्यं नाम नान्यत् अतिपेशलवातावरणात् । काचन स्त्री, या अन्यत्र न सुलभसङ्गमा महाकुलप्रसूतत्वात्, सकलगुणगणसुरभितायापि, स्वप्राप्त्यै बहु प्रयतमानायापि असन्निहितेव दूरदूरप्राप्या एवासीत्, सैव अस्मिन्नद्रौ (रैवतके) रहस्सततसन्निहितेव, अतिस्निग्धेव, पूर्वतश्शतशो भिन्नेव अदीर्घरोषा सद्योरतरागप्रसादिनी सञ्जायते । किं कारणम्? निर्जन-रहःस्थलस्थितिरेव । सा नाम उद्दीपन-उन्मादनावस्था-साधिका, स्थल संविधनसामग्री स्वतस्सिद्धा अत्रैव गिरौ सिद्ध्यति । कविरयं अयत्नसिद्धेन यमकेन, ईदृशवस्तुवर्णने सद्यःपातिदोधकवृत्तेन च सन्तुष्यतितराम् । सभ्यतां च रक्षति; शृणुत—

या न ययौ प्रियमन्यवधूभ्यः सारतारगमना यतमानम् ।
तेन सहेह बिभर्ति रहःस्त्री सा रतरागामनायतमानम् ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अन्यदन्यानुकरणयोग्यं आत्मनैव कविना सहजवत्सलतयाऽनुभूतं किमपि अकृत्रिमं सन्निवेशसौन्दर्यं सहृदया अनुभवन्तु । आत्मजेषु अतिवत्सलः पिता । स्वैरमङ्कारोहण-लुठनादिषु पुत्राः पुत्र्यश्च परिचिताः स्नेहेन संसारिपस्तस्य । दैवादेका पुत्री परिणीता, पतिगृहं च जग्मुषी चलति पुरः । अरण्यौकसः कण्वस्यैव नाम तावत् कण्ठःस्तम्भितः । यावन्न स शक्नोति किमपि वक्तुम्, केवलं रोदिति । तादृशी परिस्थितिः इदानीं रैवतकस्यापि । एतावताऽऽत्मनैव जनिताः संभृताः पोषिताश्च दुहितर इव नद्यः पुरो गच्छन्ति पतिं समुद्रमुपगन्तुम् । वात्सल्यादसौ रैवतकः (पितृस्थानीयः) अनुरोदितीव पक्षिणामतिदीनेन विरुतेन ! उत्प्रेक्षालङ्कारेण कियदङ्कूरितं स्वाभाविकं संसारिवृत्तमत्र श्लोके ! । श्लोकोऽयम्—

अपशङ्कमङ्कपरिवर्तनोचिताः
चलिताःपुरः पतिमुपैतुमात्मजाः ।
अनुरोदितीव करुणेन पत्रिणां
विरुतेन वत्सलतयैव निम्नगाः ।।

'अयं रैवतकः हिमाचलवत् वर्तते' इति वर्णनं सामयिकम् । भवतु हिमाचलवदेव ! । तथापि किंचिद्विशेषः वर्तते अत्रेति व्यतिरेकविधया प्रस्तौति कविः । विदाङ्कुर्वन्तु - अतिशीतलं हिमाचलमीश्वरोऽपि सन् शिवः अधिशेते । नाश्चर्यम् । कुतः? 'सान्द्रेभचर्मवसनावरण एव किल सः शैत्यपरिहारेच्छया । परं त्वत्र रैवतके वसन् एकोऽपि — सः अकिंचन एव, शीतोष्णदुःखपरिहारोपकरणवियुक्तः — कदाऽपि शीतोणदुःखं नैवोपैति । सदा सर्वर्तुभिः सुखकर एवासौ पर्वतः इति कृत्वा । सदा

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संनिहितानामृतूनामन्योन्यदोषनिवारकत्वात् । 'अहमकिञ्चनः, शीतोष्ण- दुःखनिवारकोपकरण-सम्पादनासमर्थः' इति न कोऽपि दैन्यमनुभवति, प्रत्युत सुखं निवसति अत्र । अतः हिमाचलाद्विशेषः । अतश्च व्यतिरेकः सुश्लिष्टः । श्लोकोऽयं मनोहरः दृश्यताम्—

प्रालेयशीतमचलेश्वरमीश्वरोऽपि
सान्द्रेभचर्मवसनावरणोऽधिशेते ।
सर्वर्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किंचिदकिंचनोऽपि ।।

एवं रसभरे माघे कतिभिः रसिकैः वयो नीतं—न जानीमः । यावच्छक्यं सहृदयैः वयो नीयताम् माघपरिशीलेन, पुमर्थः प्राप्यताम् ।।

प्रधानं सुखदुःखमोहात्मकम्। जगदपि सुखदुःखमोहान्वितमेव अनुभूयते जगत् सुखदुःखमोहात्मकप्रधानकारणाकम्, सुखदुःखमोहन्वितत्वात्, मृदन्वित घटदिवत् इति अनुमानेन प्रधानकारणकत्वमेव जगतः सिद्ध्यति न ब्रह्मणो जगत्कारणत्वम् – इति पूर्वः पक्षः ।

सिद्धान्तः - ब्रह्म एव जगत्कारणम् न प्रधानम्। लोके बुद्धिमतः कुशलस्य शिल्पिन एव विचित्रप्रासादादि निर्माणात्मकं कार्यं दृश्यते । अचेतनस्य स्रष्टव्य-विषयकज्ञाना-भावात् विचित्रप्रपञ्च-निर्माणात्मकं कार्यं दृश्यते - इति ।

सूत्रार्थः –अनुमानं सांख्यस्मृतिसिद्धं प्रधानं न जगदुपादनं न । कुतः? रचनानुपपत्तेः अचेतनात् स्रष्टयव्यज्ञानरहितात् प्रधानात् रचनस्य नानाविधविचित्रप्रपञ्च निर्माणस्य असंभवात्। सूत्रस्थः चकारः सांख्योक्तस्य प्रधानोपादानकत्व साधकस्य सुखदुःखमोहान्वितत्वरूपस्य हेतोः जगति पक्षे स्वरूपासिद्धिं समुच्चिनेति, यतः सुखादीनामान्तरत्वानुभवात् बाह्यस्य जगतः सुखाद्यन्वितत्वमसिद्धम्। (१९४)

–ब्रह्मसूत्रवृत्तिः गुरुप्रिया-श्रीश्रीजयेन्द्रसरस्वती स्वामिनः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

क्षेमङ्करः ।

क्षेम, प्रिय, मद इत्येतेषु कर्मवाचकाब्देपूपपदेषु 'डुकृञ् करणे' इत्यस्माद्धातोः 'क्षेमप्रियमद्रेऽण्च' (३.२.४४) इति सूत्रेण खच्प्रत्ययो विधीयते । 'कर्मण्यण्' (३.२.१) इत्युत्सर्गसूत्रस्य पाक्षिकोऽयमपवादः । अतः पक्षेऽण्प्रत्ययोऽपि भवति । क्षमङ्करः - क्षेमकारः, प्रियङ्करः - प्रियकारः, मद्रङ्करः - मद्रकारः इत्युदाहरणानि । यथा क्षेमं करोतीत्यर्थे प्रकृतसूत्रेण खति 'अरुद्विषदजन्तस्य मुम्' (६.३.६७) इति मुमागमे प्रातिपदिकविभक्तिकार्येषु क्षेमङ्करः । तदभावपक्षे उत्सर्गे अण्प्रत्यये 'अचोऽञ्णिति' इत्यजन्ताङ्गस्य वृद्धौ रपरत्वे विभक्तिकार्येषु क्षेमकारः ।

भट्टिकाव्ये रामसुग्रीवयोः सख्यवर्णनाप्रसङ्गादुद्धृतमुदाहरण-मवलोकयन्तु - उपाग्न्यकुरुतां सख्यमन्योन्यस्य प्रियङ्करौ । क्षेमङ्कराणि कार्याणि पर्यालोचयतां ततः ।। (भट्टिः ६.१०५) । उपाग्नि = अग्निसमीपे रामसुग्रीवौ सख्यमकुरुताम् = इतः प्रभृत्यावयोः सख्यमिति । ततः सख्यकरणानन्तरमन्योन्यस्य प्रियङ्करौ = हितकरौ तौ रामसुग्रीवौ क्षेमङ्कराणि = हितजनकानि यथास्वं कार्याणि प्रत्यालोचयतां = निरूपितवन्तावित्यर्थः ।

भट्टिकाव्ये एवान्यत्र रावणहनूमतोः वाग्वादप्रसङ्गे रामेण कृतं सर्वमपि कर्म आक्षिप्य आत्मानं साधुकुर्वते रावणाय प्रत्युत्तरयति हनूमान् - यत्स्वधर्ममधर्मं त्वं दुर्बलं प्रत्यपद्यथाः । रिपौ रामे च निःशङ्के नैतत् क्षेमङ्करं चिरम् । (भट्टिः ९.१३१) यदधर्मं परस्त्रीभोगहरणं दुर्बलमसारम्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अश्रेयसामावाहकत्वात् तदेव त्वं स्वधर्ममात्मीयमाचारं प्रत्यपद्यथाः = प्रतिपन्नवानसि, स्वधर्म एव नराश्निनामिति यावत् । यच्च रिपौ रामे निःशङ्कः निर्भयः विहरसि का मे साशङ्का त्वयीति तदेतदुभयमपि न चिरं क्षेमङ्करं = कल्याणकरम् । भार्यापहाररूपेणाधर्माचरणेन रामस्तव रिपुः संवृत्तः । तदिदानीं राममवज्ञाय यदहङ्करोति तदुभयं तव नाशायेति भावः ।

प्रियङ्करः ।

प्रियं करोतीत्यर्थे प्रियोपपदात् कृञ्धातोः प्राग्वत्खच्प्रत्यये मुमागमे च प्रियङ्करः । उत्सर्गे अण्प्रत्यये प्रियकारः इत्यपि भवति । उपाश्यकुरुतां सख्यमन्योन्यस्य प्रियङ्करौ । क्षेमङ्कराणि कार्याणि पर्यालोचयतां ततः ।। (भट्टिः ६.१०५) इति पद्यमुपरिष्टात्क्षेमङ्करशब्दमुदाहर्तुमुद्धृतम् । तत्रास्य विवरणं दृश्यताम् ।

मद्रङ्करः ।

मद्रं करोतीत्यर्थे मद्रोपपदात् कृञ्धातोः प्राग्वत्खच्प्रत्यये मुमागमे च मद्रङ्करः । उत्सर्गे अण्प्रत्यये मद्रकारः इत्यपि भवति । हर्षे मङ्गले च गम्यमाने मद्रशब्दः प्रयुज्यते ।

आशितम्भवः ।

अयमन्यः खच्प्रत्ययान्तः शब्दः । 'आशिते भुवः करणभावयोः' (३.२.४५) इति सूत्रेण आशित इत्यस्मिन् सुबन्ते उपपदे 'भू सत्तायाम्' इत्यस्माद्धातोः करणे भावे चार्थे खच्प्रत्ययो भवति । यथा आशितम्भव ओदनः । तृप्तिकर इत्यर्थः । आशितम्भवं वर्तते । सुष्ठु वर्तते इत्यर्थः ।

हित्वाऽऽशितङ्करीतानि तत्फलै र्येष्वाशितम्भवम् । तेष्वसौ

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दन्दशूकारिर्वनेष्वानभ्र निर्भयः । (भट्टिः ४.११) । असौ = रामः आश्रितङ्गवीनि = गोभक्षितकुश्पलालादिकानि हित्वा = त्यक्त्वा अर्थाद् गवामपि स्वच्छन्दविहारे विघातो मा भूदिति धिया वनान्तरं गत्वा येषु = वनेषु फलैः आश्रितम्भवं = तृप्तिः भवति तेषु = वनेषु निर्भयः = भयरहितः आनभ्र = बभ्राम । रामः प्रकृत्यैव निर्भयः तथापि निर्भयो विजहारेत्यनेन यत्र गावश्चरन्ति जनपथप्रान्तवर्तिषु रिक्तेषु वनभूमिषु तत्र रामवियोगाकुलाः प्रजाः वनवासविघ्नं कुर्युरिति भयमपहाय पूर्णेषु विजनेषु वनेषु गत्वा विजहारेत्यर्थः ।

उदाहरणान्तरमवलोक्यते भट्टिकाव्य एव; यत्र प्रसादपूर्णं स्वाभाविकञ्च वानराणां चेष्टितं दृष्ट्वा सन्तुष्टो राम इत्याह - आश्रितम्भवमुत्कुष्टं वल्गितं शयितं स्थितम् । वह्वमन्यत काकुत्स्थः कपीनां स्वेच्छया कृतम् । (भट्टिः ६.१०६) । आश्रितम्भवम् = अशनम् तृप्तिश्च उत्कृष्टम् = उच्चैः क्रोशनं क्ष्वेडितमित्यर्थः । वल्गितं = धावनम् तथा शयितं = शयनं स्थितं = स्थितिं च कपीनां स्वेच्छया कृतं एतत्सर्वमपि काकुत्स्थो बह्वमन्यत श्लाघितवान् । पुण्यभाज इमे यदेषां स्वेच्छाविहारिणां चेष्टितं अस्माकं तु शोकसन्तप्तानां न किञ्चिदस्तीति भावः ।

अन्यत्र भट्टिकाव्ये सीतामन्विष्य लङ्कां गच्छतो हनूमतो मार्गमवरुद्ध्य स्थितायास्तदनु तेन हतायाः सुरसायाः वर्णनाप्रसङ्गे उदाहरणान्तरमवलोक्यते - न्यविक्षत महाग्राहसङ्कुलं मकराऽऽलयम् । सैका बहूनां कुर्वाणा नक्राणां स्वाऽऽश्रितम्भवम् । (भट्टिः ८.७) । सा राक्षसी = सुरसा एकाकिनी सत्यपि बहूनां नक्राणां = कुम्भीरारां स्वाश्रितम्भवं = सुष्ठु तृप्तिं कुर्वाणा सती विशालावहारव्याप्तं समुद्रं प्रविवेशेति भावः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्री शिवोत्कर्षमञ्जरीटीका - घट्टार्थबोधनाम्नी । (अनुवर्तते)

—श्री शिवानन्दयोगीन्द्रः (दिवंगतः)

यस्य सर्वे देवा; शेषभावं गताः स एव शेषी मत्स्वामीत्याह— शक्त्यर्धमिति । पुरा त्रिपुरसंहारे सुरास्संभूय चिन्तयन्तो मम शक्त्यर्धं युष्मासु विनिवेशयामि प्रतिगृह्णीतेति उपच्छन्दिताः प्रतारिताः सन्तो वयं शक्त्यर्धस्य वहने न समर्थाः स्मः इति सर्वे शरादिविधया यस्य शेषतां अङ्गुलीनखकेशादिवत् अङ्गभावं जग्मुः स स्वामीत्यर्थः ।। ३५

सर्वदेवपूज्यवेद एव यस्य वाहः स स्वामीत्याह — यानब्धाविति । शौरिर्यान् वेदान् अब्धौ निमज्य सोमकं निहत्योद्धृत्य चिरायावहत् । तदेकमेव महतां ब्रह्मविदां माहात्म्यम् । नावेदविन्मनुते तं बृहन्तम् । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । वेदो धर्ममूलम्' — इत्यादिशास्त्रैः वैदिकमाहात्म्यमुद्घुष्यते । यानद्यापि विधिर्वदनैर्बिभर्ति । त आगमा यमेव वहन्ति स मत्स्वामीत्यर्थः ।। ३६

श्रीमहादेव एव सकलदेवपरिवृढ इत्याह - जेतुमिति । त्रिपुराणि जेतुं सुरैरभ्यर्थ्यमानेन येन सहसा धरित्री - रथे आरूढे, वेदाश्वेषु भुग्नजानुषु सत्सु चटचटध्वनिना रथभङ्गं पश्यन् हरिः वृषो भूत्वा प्रयस्यन्तं रथं वोढुं शेषात्मना स्वयं विधृतमपि न शशाक । ननु हरिः कुतश्च वृषो भूत्वोदवहद्भूमीरथमित्यत्राह — पुरा मेधवाहनकल्पे धर्मे शिववाहनत्वावाप्त्यर्थं तपोनिष्टे स्वसाक्षात्कारमप्यपहसति, स्वयमपि तद्वाहतेप्सुरासीत् । शङ्करसंहितायाम् । गन्धमादनमासाद्य कदाचिद्विष्णुख्ययः । समाराध्य महादेवं वरद्वयमयाचत ।। मामङ्गी कुरु देवेश वाहनत्व शरत्वयोः । अस्त्वित्युक्त्वाऽथ तं चक्रे दाहे तु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तिसृणां पुराम् । वाहत्वे शरत्वे च कल्पयामास माधवम् । वृषेन्द्रो भगवान् विष्णुः स तदारभ्य हेतिराट्' इति । स मत्स्वामीत्यर्थः ।

देवस्य सपरिच्छदस्य शब्दमात्रेणापि महती प्रसिद्धिरस्तीत्याह — अम्बेति । यस्य गृहमेधिनी गिरिजाशब्दान्तरमुन्मुच्य जगतां अम्बाख्या भवति । तथैव जनाः एकमेवेश्वरं जनेश्वरनरेश्वरादिवत् उपपदं सन्त्यज्य वदन्ति । प्रतियोगिशब्दं मुक्त्वा यत्सूनुं कुमारं वदन्ति । तत्र मानानि । ईशावास्यमिदँ सर्वं, तमीश्वरणाणां परमं महेश्वरम् ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानाम् । शब्दादेव प्रमितः इत्यधिकरणे भाष्यमीशनशब्दादेव परमात्मैवोदीरितः इति । एते शब्दाः एकधातुजाः । 'हरिर्यथैकः,पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः' इति पुराणम् । 'यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः । शब्दमीश्वरमित्युच्चैस्सार्धं चन्द्रं बिभर्ति सः ।' इति कालिदासः । ईश्वरश्शर्व ईशानः इति निघण्टुः । अतश्च यमेकमेव ईश्वरं शास्त्राणि वदन्ति । तथा च यद्बृहमेधिनी अम्बा । श्रियं लक्ष्मीमौपलामाम्बिकां गाम्' इत्यायुस्सूक्ते । त्र्यम्बकेष्ट्याम् । 'आखुस्ते रुद्र पशुस्तं जुषस्व, एष ते रुद्र भागस्सह स्वस्राम्बिकयेति च शब्दान्तरमुन्मुच्य त्रिजगतामम्बेति वदन्ति शास्त्राणि । श्रुतिर्यत्सूनुं प्रतियोगिशब्दं मुक्त्वा कुमारं वदति । कौ भूम्यां मार इव मारः कुमारः कुत्सितानसुरान् मारयतीति वा कुमारं वदति । उमाकोमलहस्ताब्ज-सम्भावितललाटिकम् । हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् इति । स मत्स्वामीत्यर्थः ।। ३८ ।।

श्रीशिवः सर्वजगत्तन्त्रं श्रीचिक्तिक्पिरम्परायां दत्वा स्वयं सुखमास्ते इत्याह — विश्वमिति । शिवस्वाभिन्ना परा शक्तिः विश्वं मुञ्च बधान

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वेति शिवेन यथाऽऽज्ञापिता तथा सा देव्यपि । स्वयमिमं सर्वभरं ज्ञानेच्छाकृतिशक्तिषु विन्यस्य, ततः कर्तव्याभावात् या परा शक्तिः अनुत्तरसामरस्य-परमानन्दानुसन्धायिन्यास्ते स स्वामीत्यर्थः ३९ ।।

सकलभुवनव्यापकं कलापञ्चकं यच्छक्तिकणलेशेन व्याप्तं स मत्स्वामीत्याह — उन्मीलदिति / अग्रे चतुश्चतुरग्रं विंशतिशतयोः द्वन्द्वं च चतुरग्रविंशतिशतद्वन्द्वम् । तदात्मना सम्पन्नया संख्यया । निर्भक्तैर्विभक्तैः । सनेतृभिरपि नेतारस्तत्तद्भुवनाधिपाः तैस्सह वर्तन्त इति सनेतृभिरपि तैर्भुवनैर्व्याप्तं कलापंचकमिति । कथमित्यत्राह — कालाग्नि-रुद्रादि- भद्रकाल्यन्तानि षट्पञ्चाशद्भुवनानि निवृत्तिकलया व्याप्यन्ते । अमरेशादिश्रीकण्ठान्तानि षट्पञ्चाशद्भुवनानि प्रतिष्ठाकलया व्याप्यन्ते । एतत्कलाद्वयगतभुवनानि अशुद्धान्यात्मतत्वानि । वामाद्यङ्गुष्ठमात्रान्तानि सप्तविंशतिभुवनानि शुद्धाध्वमयानि विद्याकलया व्याप्यन्ते । वामादिसादाख्यान्तानि अष्टादशभुवनानि शान्तिकलया व्याप्यन्ते । निवृत्तिकलाद्यनाश्रितान्तानि पञ्चदशभुवनानि शान्त्यतीतकलया व्याप्यन्ते । एतत्कलाद्वयभुवनानि शुद्धाध्वमयानि । आहत्य चतुर्विंशत्युत्तर द्विशतभुवनानि तत्तद्भुवनाधिपैस्सह कलापञ्चकेन व्याप्यन्त इति भावः । एतदेव श्रीमद्दीक्षितचरणैः शिवध्यान पद्धत्यां सङ्ग्रहेणोक्तम् । 'चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम् । भुवनाध्या स संचिन्त्यो लोमबृन्दात्मना विभोः' ।। इति । इदमगस्त्यसंसहितायाम् - 'आत्मतत्वमधोभागे विद्यातत्त्वं तु मध्यमे । तदग्रे शिवतत्त्वं च क्रमात् तत्त्वानि सन्ति हि ।।' इति । एवं भूतमुन्मीलत् विकसत्कलापञ्चकम् यस्याः पराशक्तेः कोट्यंशलेशे परिसमाप्यते । स स्वामीत्यर्थः ।। ४०

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पूर्णानन्दनिधिः परशिव एवेत्याह - यस्येति । यस्यानन्दमहार्णवस्य या कापि कणिका अविद्यानिलव्याधूता सती शतधा विभिद्य भुवनं व्याप्ता भवति । ब्रह्म त्वम् त्वमसीति वादमुखरैः श्रुतीनां गणैर्यदीया चानन्दकणिका अद्यापि अन्विष्यते स एव मम स्वामीत्यर्थः ।। ४१

(अनुवर्तते)

तापिञ्छस्तबकत्विषे तनुभृतां दारिद्र्यमुद्राद्विषे
संसाराख्यतमोमुषे पुररिपोर्वामाङ्कसीमाजुषे ।
कम्पातीरमुपेयुषे कवयतां जिह्वापुटीं जग्मुषे
विश्वत्राणपुषे नमोऽस्तु सततं तस्मै परं ज्योतिषे ।।

காசாம்பூ கொத்தின் அழகு கொண்டதும், மக்களுக்கு (எப்படியோ) தோன்றும் ஏழ்மையை 'வேண்டாமே' என்று வெறுப்பதும், உலகாயத வாழ்க்கையென்ற இருளை (எவரும் அறியாதபடி) கவர்வதும், முப்புரம் எரித்து சிவபெருமானின் இடது பக்கத்தை இருக்கை இடமாக ஆக்கிக் கொண்டதும், கம்பா நதிக் கரையைச் சேர்ந்துள்ளதும், கவிதைப் புனைந்து பாடுவோரின் நாக்குப் பேழையைச் சார்ந்திருப்பதும், உலகப் பாதுகாப்பை (தாய்மையுடன்) போஷிப்பதுமான பேரொளிக்கு நம் நமஸ்காரங்கள் உரியதாகட்டுமே !

—ஸ்ரீ மூககவி-மூகபஞ்சசதீ - ஸ்துதி ஶதகம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(अनुवर्तते)

—तामरश्शेरि शङ्करन् भट्टतिरिकृतम् ।

पादाब्जसेवन-समर्चन-वन्दनादि-
नानामुखं भजनमत्र यथात्मशक्ति ।
त्वत्तोषणैकफलमाचरितं मयैतत्
अङ्गीकुरुष्व सदयं मरुदालयेश ! ।। ४७

सख्यं तवार्हति सुदामधनञ्जयादिः
सम्पादितप्रियतमत्वसमानुभूतिः ।
तस्मादनल्पसुखदां श्रयते तु मह्यम्
देहि त्वदीयचरणाम्बुजदास्य भक्तिम् ।। ४८

अङ्गीकृतोऽस्मि यदि वातनिकेतनाथ !
दासस्त्वया सदयमुज्झितपापपुञ्जम् ।
आत्मानमाप्तपुरुषार्थमतीव धन्यं
मन्ये किमन्यदभिकाम्यमिहास्ति भाग्यम् ।। ४९

त्वद्दर्शनाय भवमुक्तिफलाय कुन्ती-
देव्या कृतं विपदपेक्षणमात्तधैर्यम् ।
शक्नोति कस्तदनुकर्तुमिहार्थयेऽहं
दीनस्तदीयहरणं, निखिलाश्रयोऽसि ।। ५०

एकं वरं यदि ददासि समाश्रिताय
मह्यं निबद्धविनयाञ्जलिरर्थये त्वाम् ।
प्रेमाखिलोत्तममुपाधिविहीनमस्तु
त्वय्येव गोपवनिताजनजीवनेति ।। ५१

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मित्राणि सन्ति विविधानि सुताश्च सन्ति
पत्नी च सेवकगणास्सहजाश्च सन्ति ।
न ह्यस्ति कोऽपि भवभीति-निवारणार्थं
त्वामात्मरक्षकमतश्शरणं प्रयामि ।। ५२

अन्यापकर्षमभिवीक्ष्य निगूढहर्षाः
स्वीयोन्नतिप्रकटने बहवस्सतर्षाः ।
एतेष्वहैतुकपरोन्नमनाभिलाषः
को नाम, सर्वजनमुद्धरसि त्वमेकः ।। ५३

ज्ञानादयो बहुविधास्त्वदवाप्तियोगाः
सन्ति, स्वकीयरुचिभेदनिषेव्यमाणाः ।
क्लेशावहाः, सुखकरी सुगमा च भक्तिः
तामेव देहि मरुदालयनाथ ! मह्यम् ।। ५४

एको रसो जयति भक्तिरिति प्रसिद्धः
श्रीकृष्ण ! तावकपदाब्जमरन्दरूपः ।
तं नित्यनूतनमनन्यसमं स्वदित्वा
मृत्युं तरन्ति मनुजास्तमहं भजे त्वाम् । ५५

भीष्मादिभिः शिवपद्मजाद्यैः
अन्यैरमर्त्यनिकरैर्मुनिभिश्च सिद्धैः ।
अभ्यर्थिता तव पदाम्बुजभक्ति रेका ।
सा लभ्यते यदि मया, सफलं नृजन्म ।। ५६

(अनुवर्तते)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीमत्परशुरामायणम् । (अनुवर्तते)

सप्तमस्सर्गः

---रचयिता - विद्यावारिधिः डा. निष्ठळ सुब्रह्मण्यशास्त्री पोन्नूरु

हे हैहयकुलोद्भूत ! कार्तवीर्य महाभुज ! ।
समौ त्वं जमदग्निश्च नारदोऽब्रूत भूपतिम् ।। १

सर्वराजग्रहेषु त्वं दिवाकर इव स्थितः ।
जमदग्निः कलानाथः नक्षत्राणां यथा शशी ।। २

उभौ विनयतःकालमहरस्कर निशाकरौ ।
भासेते मूलपुरुषौ मुरारिशशिशेखरौ ।। ३

स त्यागशीलो धर्मात्मा दधीचिरिव विश्रुतः ।
दाता पराक्रमी धर्मी शिबिरौशीनरो भवान् ।। ४

निघ्नन् द्विषन्तं त्वं भासि यथा द्विषन्मधुं हरिः ।
उभौ भवन्तौ युज्ञानौ ब्राह्म्यक्षात्रविराजितौ ।। ५

इति श्रुत्वा नारदस्य वचस्सोढा नचार्जुनः ।
दत्तात्रेयाल्लब्धवरः किमहं नाधिकः क्षितौ? ।। ६

कस्यास्ति बाहुसाहस्री श्रीदत्तप्रियशिष्यता ।
शैशवेभ्यस्तबाहुत्वं तपः कस्यास्ति दुष्करम् ! ।। ७

अतिशेते क्षात्रतेजः ब्राह्म्यं सर्वत्र भूतले ।
ऐहिकामुष्मिकफलं क्षात्रमेव युगे युगे ।। ८

नारदस्त्वेवमब्रूत ब्राह्म्य एव प्रतिष्ठितः ।
अर्जुनस्त्विति सञ्चिन्त्य तं दिदृक्षुर्ययौ वनीम् ।। ९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बभ्राम बहुशो वीरस्त्वरण्यान्यामतन्द्रितः ।
कथं मत्समतां धत्ते विप्र एक इति स्मरन् ।। १०

ददर्शाश्रममव्याजं फुल्तानोकहभासितम् ।
शिरोभिरानतैर्यत्र फलपुष्पपदाः कुटाः ।। ११

विहीना अपि पुष्पाद्यैः छदनैर्हरितैः श्रिताः ।
आह्वयन्तः पिकारावैः समदृश्यन्त भूरुहाः ।। १२

भाववायुप्रचलिताः रागपल्लवशोभिताः
विभ्रमा सूनधारिण्यः स्वनृत्यन्त लताः पुरः ।। १३

दृश्यन्ते च महीरुक्षु वासःखण्डास्समन्ततः ।
सूचयन्त्याश्रमपथं मार्गाय वटुभिः कृताः ।। १४

मातरिश्वनि कोऽप्यस्ति गन्ध आज्यसुमस्पृशः ।
मन्य आश्रम आयातः पदव्यस्सुष्ठुसङ्गताः ।। १५

न प्रसूनानि भिन्नानि पतितानि महीतले ।
काले प्राभातिके मन्ये केनाप्यवचितानि हि ।। १६

मृगाश्चरन्ति सुस्निग्धं न द्विषन्ति मिथश्चराः ।
पादपाः क्रमसंरूढा आलवालोपशाभिताः ।। १७

रजो न सञ्चयापन्नं जलसेकः क्वचित्कचित् ।
मनः प्रसीदति शनैः मन्ये ह्याश्रम आगतः ।। १८

स जगाम पुरो मार्गे दूरे सैन्यं विसृष्टवान्
वटूनपश्यदायुक्तानासीनप्रचलायितैः ।। १९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शत्रुता च ययोरस्ति जन्मप्रभृति जन्तुनोः ।
स्वजेते स्म मिथः प्रीत्या जन्मजन्मप्रिया इव ।। २०

क्वचिदागमसन्तानः सारताकर्षको बहुः ।
क्वचिन्निगमविश्रावः मोक्षलक्ष्म्या जयध्वनिः ।। २१

(अनुवर्तते)

कृत्स्नो हि लोको बुद्धिमतामाचार्यः ।
शत्रुश्च अबुद्धिमताम् ।

உலகமனைத்தும் அறிவாளிகளுக்கு வாழ்க்கை நடைமுறையின் வழிகாட்டி. அறிவற்றவனுக்கு அதுவே எதிரி.

—ஸுபாஷிதம்

विश्वेषां नयनोत्सवं वितनुतां, विद्योतनां चन्द्रमाः
विख्यातो मदनान्तकेन मुकुटीमध्ये च संमान्यताम् ।
आः ! किं जातमनेन हाससुषमा मालोक्य कामाक्षि ! ते
कालङ्कीमवलम्बते खलु दशां कल्मषहीनोऽप्यसौ ।।

காமாக்ஷியன்னையே ! உலகத்தவர் அனைவரின் கண்களுக்குமே விருந்தளிக்கட்டுமே சத்திரன் ! வானில் கூட விளங்கட்டுமே மன்மதனுக்கு எதிரியான சிவனுல் கூட மகுடத்தின் நடுவில் வைத்து பெருமைப்படுத்தபடட்டுமே ! அடடா இதனுல் எல்லாம் என்னவாயிற்று? அன்னையே ! நினது சிறிப்பு அழகைக் கண்ணுற்று, களங்கமே இல்லாதிருந்தவன் (அவன்) கூட ஏனே களங்கியானனே ! பாவம் !

—ஸ்ரீமூககவி - முகபஞ்ச சதீ-மந்தஸ்மித ஸதகம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुक्तकमौक्तिकानि ।

--श्री सुन्दरराजः I.A.S. Retd. भुवनेश्वरम् ।

वृषगिरिपतिः शरणभाजां भविजन्मधारी

भजति शरणभाजां भाविनो जन्मभेदान्
वृषगिरिपतिमस्तौदित्यसौ देशिको नः ।
अलसमनस एते रोगिणः किं दरिद्राः
कपिविहगविडाला आलये ये चरन्ति ।।

नटराजढक्का

नटेशकृतनर्तनात्परमुदेतढक्कारवात्
गिरो भुवि कृतोदया अमरगीस्तु तासूत्तमा ।
चतुर्दशभिरुज्ज्वलैर्यदिह संस्कृतं सूत्रकैः
मुनिर्मननवानयं प्राणिनिनाय तत्पाणिनिः ।।

महाशशिवसूत्रजालमनु पाणिनेर्यः परः
वरो वररुचिर्मुनिः व्यरचयत्परं वार्तिकम् ।
पतञ्जलिरतः परं प्रणिनिनाय भाष्यं महत्
यदध्ययनिनो बुधाः दधति संस्कृताध्यापनम् ।।

त्रिवृद्धानां क्रमः

ज्ञानवृद्धाः शीलवृद्धाः वयोवृद्धा इति त्रयः ।
पौर्वापर्येण कस्तेषु पूजामर्हति तच्छृणु ।।

त्रिवृद्धास्तु सदा वृद्धाः पूजनीया; वयःक्रमात् ।
अनन्तरं शीलवृद्धाः पूजानीयाः वयःक्रमात् ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तत्परं ज्ञानवृद्धास्ते पूजनीयाः वयःक्रमात् ।
ये केवलं वयोवृद्धाः पूज्यास्तेऽन्ते वयःक्रमात् ।।

नायक-निर्णायक-विनायकान् प्रति

निर्णायकेन सदसा चितनायको हि
निर्णायको भवितुमर्हति नान्य एकः ।
निर्णायकस्य सदसो न नियामकोऽस्ति
निर्णायके सदसि नापि विनायकोस्ति ।।

वैयाकरणानां स्फोटवादः

अस्माकं तु क्षराणां श्रवणदृगपथे योऽक्षरैरक्षराणां
स्फोटो नित्यं प्रपंचे प्रचलति कलितो ह्युतमेनाक्षरेभ्यः ।
शब्दे शास्त्रेऽस्मदीये निगमितमिह यद् ब्रह्म किं स्फोट एषः
कर्णे कुर्वन्तु वैयाकरणचणगणाः वर्णितं तन्मयैतत् ।।

वात्सल्य भक्तिः

कृत्वा वात्सल्यभक्तिं हरिपदनलिने स्त्री पुमान् दम्पती वा
पुत्रत्वे प्राप्य कृष्णं तदुपचरणतो भूयसीं भूतिमेति ।
पद्म्या सार्धं चरित्वा हरिमभजदृषिः कश्यपः पुत्रभावे
सालग्रामं पतित्वा हिमगिरिशिखरात् गण्डकीमुक्तिनाथे ।।

दास्य भक्तिः

जीवन्नेवात्र लोके तव यदि सततं जीवितुं तावदिच्छा
दीव्यन् वा देवलोके तव विलिलसिषा देववत् षोडशाब्दः ।
ज्योतिर्नित्यं ज्वलन् सत् वियति सुविपुले द्योतितुं वा तवेच्छा
सिद्ध्येत् द्वारा गुरोस्तत् हरिपदनलिने दास्यतो दास्यभक्तिम् ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रेमभक्तिः

अत्यन्तप्रेमभक्तिः भगवति यदि ते तर्हि नारायणस्त्वाम्
नेता वैकुण्ठलोकं निकटमपि निजं सार्ष्टिसायुज्यदायी ।
सार्धं रन्ता त्वयाऽयं रमयितृरमया मुक्तमायो मुकुन्दो
लीनं त्वमन्तरात्मन्यपि कलयिता नात आवृतिशंका ।।

आत्मनिवेदन भक्तिः

अत्रोदाहर्तुमीहे मतमनु विविधं जातिवर्णादिहीनान्
लिङ्गव्यत्यासवर्जं पुरुष इति पुनः स्त्री पुनर्वेति भक्तान् ।
मीराचैतन्यराधोद्धवगुहशबरीगोपिकाऽक्रूरबृन्दाः
आल्वाराचार्यमुख्याः अवतरणकृतो नायिका वा यथाऽऽण्डाल् ।।

(अनुवर्तते)

अनितरसुखसाध्यं लोभनीयं महार्घं
सुरभिसदुपदेशैः लोकसौख्यं दधाना ।
जयति विजययात्रा सद्गुरोः कल्पवल्ली
जगति न सहते या भक्तिदुर्भिक्षलेशम् ।।

பூஜ்யஸ்ரீ மஹாபெரியவாளின் விஜய யாத்ரை என்பது ஒரு கல்பகக் கொடியையொத்தது. அது, பக்தர்களைத் தவிர மற்றவரால் எளிதில் எட்டியடையமுடியாதது, ஆனல் அடையவேண்டுமே என ஏங்கி வேண்டப்படுவது, மிக உயர்ந்த உலக நன்மையைப் பயக்கவல்லது, மணமுள்ள உபதேச மலர்களைத் தன்னகத்தே கொண்டது. அது, உலகில் எள்ளளவும் பக்திப் பஞ்சம வரக் கூடாதே' என்று கவனமாக ஆவனச் செய்வதும் கூட!

--ஸ்ரீ சந்த்ரசேகரேந்த்ர ஸரஸ்வதீ விஜயகாவ்யம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वमिदमर्थतः सत्यं परार्थतः असत्यमिति मनस्तुष्ट्यर्थं विज्ञानार्थमुच्यतां न हि किञ्चिदप्यसत्सत्ये ब्रह्मणि।

एवं यत् प्रकाशते जगदानन्द एव तत्।

ॐ तत्सत् यच्च सच्चिदेव तद्यच्च चित् स आनन्दः। यत्तु निरानन्दमिति भासते दुःखमिति दुर्बलमित्यज्ञानमिति तदानन्दस्य विकार आनन्दस्य क्रीडा।

यो हि जीवः स आनन्दमयः प्रच्छन्नो भगवान् स्वप्रकाशमयं जगद्ब्रह्म भोक्तुमवतीर्णः। य एष दुःखभोगः स भोग एवानन्दमयस्तस्यानन्दमेवानन्दमयो भुङ्क्ते।

को हि निरान्दं भोक्तुमुत्सहेत यः सर्वानन्दमयः स एवोत्सहते निरान्दमयस्तु निरानन्दं भुञ्जानः न भुञ्जीतानन्दं विना प्रणश्येत्। को दुर्बलो भवितुं शक्नुयाद्यः सर्वशक्तिमान् स एव शक्नुयात् दुर्बलो ह्याक्रान्तो दुर्बलत्वेन न तिष्ठेच्छक्तिं विना प्रणश्येत्। कोऽज्ञानं प्रवेष्टुं समर्थो यः सर्वज्ञानमयः स एव समर्थोऽज्ञस्तु तस्मिंस्तिमि न ध्रियेतासत्त्वसदेव भवेद् ज्ञानं विना प्रणश्येत्। ज्ञानस्य क्रीडाज्ञानं सर्वस्मिन्नात्मगोपनं शक्तेः क्रीडा दौर्बल्यं निरान्दमानन्दस्य क्रीडात्मगोपनं स्वात्मनि।

सानन्दं हसति जीवः सानन्दं क्रन्दत्यश्रूणि मुञ्चति तमोमय आन्दे भासमान इव यातनाभिश्चेष्टमानः सानन्दं स्फुरति सानन्दं स्फुरति चेष्टमानः प्रचण्डाभी रतिभिः। पूर्णभोगार्थं तस्यानन्दस्य तामसस्यांशस्य तामसो भूत्वानन्दं गोपायति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अज्ञानं मूलमेतस्य भावस्य सान्त एवाहमित्यशक्तो दुर्बलो दुःखी मया कर्तव्यं ज्ञातव्यं लब्धव्यं प्रयासेन तपःक्षयेण मृत्युना स त्वमेषोऽहं यत्त्वं न तदहं यत्तव शुभं तन्ममाशुभं येन तव लाभस्तेन मम हानिः त्वामेव हन्यां सुखी भविष्यामि नैव सात्त्विकोऽहं त्वामेव सुखिनं करोमि स्वदुःखेन स्वहान्या स्वामृत्युनेत्याद्यज्ञानस्य स्वरूपं मनसि ।

अहङ्कार एव बीजमहङ्कारमोक्षादज्ञानमोक्षः अज्ञानमोक्षाद् दुःखन्मुच्यते आनन्दमयोऽयं सोऽहमेकोऽहमनन्तोऽहं सर्वोऽहमिति विज्ञायानन्दमयो भवत्यानन्दो भवति ।

एष एव मोक्षः । स मुक्तः सर्वेषां भोगान् भुङ्क्ते सर्वानन्दानन्दं भुञ्जानो न सान्तैर्वियुज्यते सान्तानि भुञ्जानो नानन्तेन हीयते स एको भवति बहुर्भवति स ह्यजो जायत इव जायमानोऽपि न जायते न बध्यते न जन्म तस्य विद्यते आत्मन्यात्मना प्रकाशयाम्यात्मानमिति ज्ञानाद् विमुक्तः क्रीडते ।

लीलार्थं हि जगदानन्दार्थं लीलामय इति लीलां कुरुतानन्दस्य पुत्राः युक्ताः क्रीडतानन्दं भुङ्ध्वमेकं भोग्यं भगवन्तं प्राप्य भुङ्ध्वं सर्ववस्तुषु ।

आनन्दं हि प्रवक्ष्यामि भगवतादिष्टः । तामसमपावृत्यानन्दः प्रकाशतां तस्य पुत्राः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஸ்ரீ அரவிந்தோபநிஷத்.

தமிழாக்கம் : பி.ஆர். கண்ணன், வாஷி, நவீ மும்பாய்.

'இங்கு காண்பதெல்லாம் நடைமுறைக்கு ஸ்தியமேன்றி, பிரம்மத்தை நோக்குங்கால் உண்மை யில்லாததே' என்று சொல்வது, மனதைத் திருப்தி செய்துகொள்வதற்கும், அறிவினுக்கு ஏற்றுற்போலும் கொள்வதுதான். ஸத்தியமான பிரம்மத்தில் உண்மையில்லாதது எதுவுமே கிடையாது.

இவ்வாறு எது ஒளிர்கிறதோ அது உலகில் காணும் ஆனந்தமேதான். ஓம். அந்த எல்லாவற்றையும் கடந்து நிற்கும் தத்துவம் எப்போதும் நிலைத்து நிற்கும் தத்துவமாக உள்ளது. அதுவே ஞானவடிவம். அதுவே ஆனந்தம். எதெல்லாம் ஆனந்தமற்றதாகவும், துக்கமுள்ளதாகவும், வலிமை யில்லாததாகவும், அஞ்ஞானமாகவும் நமக்குத் தோற்றமளிக்கிறதோ, அது ஆனந்தத்தின் மாறுபட்ட நிலையே; ஏன், அது ஆனந்தத்தின் விளையாட்டே.

இந்த உடலைத் தாங்கி நிற்கும் ஜீவன், ஆனந்தமயமான பகவானே தன்னை மறைந்துக் கொண்டு தன்னுடைய ஒளியேயான உலகமாகிய பிரம்மத்தை அனுபவிப்பதற்காக இறங்கி வந்துள்ளவர்தான். இங்கு அனுபவிக்கும் துக்கமும் ஆனந்தமயமான அனுபவந்தான். ஆனந்தமயமான பகவானே அதனுள் ஆனந்தத்தை அனுபவிக்கிறார்.

யார் தன் ஆனந்த மின்மையை (துக்கத்தை) அனுபவிக்கத் துணிவார்? எவர் பூர்ணமான ஆனந்தவடிவாக இருக்கிறாரோ, அவரால்தான் முடியும். எவர் நிரானந்தமயமாக (ஆனந்தமற்றவராக) இருக்கிறாரோ, அவர் ஆனந்தமற்ற நிலையை அனுபவிக்கத் துணிந்தால், அதை அனுபவிக்கமுடியாது; ஆனந்தமின்றி அழிவையே அடைவார்.

எந்த பலங்குன்றியவனால் உடலெடுக்க முடியும்? எவர் எல்லா சக்திகளும் நிரம்பப் பெற்றவரோ, அவரால் தான் முடியும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

பலங்குன்றியவன் சக்தி இல்லாதபடியால் உட்காரக் கூட முடியாதராகிவிடுவார்; சக்தியில்லாமல் அழிவையடைவார்.

யாரால் அஞ்ஞானத்தில் உட்புகமுடியும்? எவர் எல்லா ஞானமும் நிரம்பப் பெற்றவரோ, அவரால்தான் முடியும். அஞ்ஞானியாக இருந்தால் அஞ்ஞானமாகிற இருட்டில் நிற்கக் கூட முடியாதவாக இருப்பார். அஞ்ஞானியாகவே இருந்துகொண்டு ஞானத்தின் உதவியில்லாமல் அழிவையடைவார். ஞானத்தின் விளையாட்டே அஞ்ஞானமாகும்; தன்னுள் தன்னை மறைத்துக் கொள்ளுதலாகும். சக்தியின் விளையாட்டே பலமின்மையாகும்; ஆனந்தத்தின் விளையாட்டே ஆனந்தமின்மையாகும். தன்னுள் தன்னை மறைத்துக்கொள்ளுதல் ஆகும்.

ஜீவன் ஆனந்தத்துடன் சிரிக்கிறான். ஆனந்தத்துடன் அழுகிறான். கண்ணீர் விடுகிறான். தமோமயமான (இருட்டான, அதாவது சோம்பலையும் உறக்கத்தையும் தூண்டும்) ஆனந்தத்தில் ஒளிவிடுபவன் போல, கடும் கஷ்டங்களாலும், தீவிரமான சுகங்களாலும் உந்தப்பட்டு அவன் ஆனந்தத்தில் பளிச்சிடுகிறான். அந்த ஆனந்தத்தின் தாமஸ (அதாவத சோம்பலையும் உறக்கத்தையும் தூண்டும்) அம்சத்தை முழுமையாக அனுபவிப்பதற்காக தாமஸவடிவுகொண்டு தன் உண்மையான ஆனந்தத்தை (ஆனந்த சொரூபத்தை) மறைத்துக் கொள்கிறான்.

இந்த ஜீவனுடைய எண்ணங்களாகிய, ''நான் அந்தமுள்ளவன்; சக்தியில்லாதவன்; பலங்குன்றியவன்; துக்கத்தில் உழல்பவன்'' இவைகளின் அடிப்படை அஞ்ஞானமே. ''என்னுடைய முயற்சியினால், தவத்தினால், மரணத்தி,ல் செய்ய வேண்டியது, அறியவேண்டியது, அடைய வேண்டியது நீ. நான் நீயல்ல. உனக்கு எது நல்லதோ எனக்கு அது நல்லதல்ல. எதனால் உனக்கு லாபமோ, அதனால் எனக்கு நஷ்டமே. உன்னைக்கொன்றால் நான் சுகமாக இருப்பேன். என்னுடைய துக்கத்தினால், நஷ்டத்தினால், மரணத்தினால் உனக்கு சுகம் கிடைக்குமாறு செய்யுமளவுக்கு நான் ஸாத்விகன்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(நற்பண்புமிக்கவன்) அல்லன்'' என்று இவ்வாறு மனதில் எழும் எண்ணங்கள் அஞ்ஞானத்தின் வடிவமே.

அகங்காரம் (தான் என்கிற எண்ணம்) தான் இதன் விதை. அகங்காரம் அகன்ருல் அஞ்ஞானத்திலிருந்து விடுதலை. அஞ்ஞானம் அகன்ருல் துக்கத்திலிருந்து விடுதலை. 'நான் ஆனந்தமயமானவன்; அந்த பரமாத்மாவே நான்; ஒருவனே; நான் அந்தமற்றவன்; நானே எல்லாம்' என்று உணர்ந்து ஜீவன் ஆனந்தமயமாக ஆகிருன்; ஆனந்தமாகவே ஆகிருன்.

இதுதான் மோக்ஷம். முக்திபெணற்ற அந்த ஜீவன் எல்லா அநுபவங்களையும் அனுபவிக்கிருன். எல்லா ஆனந்தங்களையும் முடிவில்லாமல் அனுபவிக்கும் அவன், ஆனநத்ங்கள் முடிவுறும்போது அவற்றின் பிரிவினுல் வருந்துவதில்லை. முடிவுள்ள அந்த ஆனந்தங்களை அனுபவிக்கும்போது அவன் முடிவற்ற பரமாத்மாவிடமிருந்து பிரிவதில்லை. அவன் ஒருவனுக இருக்கிருன்; பலவாகவும் இருக்கிருன். பிறப்பில்லாத அவன் பிறப்பவன் போல் பிறந்ததால் பிறப்பதில்லை. கட்டுண்பதில்லை. அவனுக்குப் பிறப்பில்லை. அவன் 'நான் ஆத்மாவின்கள் ஆத்மாவைக் கொண்டு ஆத்மாவைப்ப் பிரகாசப்படுத்துகிறேன்' என்ற ஞானத்தினுல் எப்போதும் முக்தனுகவே (விடுதலையடைந்தவனுகவே) விளையாடுகிருன்.

ஆனந்தத்தின் புதல்வர்களே ! இந்த உலகம் விளையாட்டிற்காகவே. இது ஆனந்தத்தைப் பெறுவதற்காக விளையாட்டுமயமாக உள்ளது என்று உணர்ந்து விளையாடுவீராக. அனுபவத்திற்குரிய ஒரே பொருளான பகவானை எல்லாப் பொருட்களிலும் கண்டு அநுபவிப்பீராக.

பகவானுல் உத்தரவிடப்பட்டு ஆனந்தத்தை நான் எடுத்துரைக்கிறேன். ஆனந்தத்தின் புதல்வர்களே ! இருளை அகற்றி ஆனந்தம் ஒளிவிடட்டும்.

* * *

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आषाढ-महिमा ।

—श्रीमती शान्ता लोकनायिकाश्री , चेन्नै ।

संवत्सरावयवस्य ग्रीष्मर्तोः कालः आषाढमासः । मानुष्यक- जीवने सर्वविधसम्पत्तिक - साम्प्रदायिककर्मणां अनुष्ठानाय महतीमार्हन्तीं अनुभूतवान् 'वसन्तकालः' इति इतः पूर्वतन ऋतुः । तदा विवाहादिसर्वविधशुभकर्माणि, देवालयोत्सवाः, यज्ञयागाद्यनुष्ठानप्रारम्भ इति महान् कोलाहलस्समभूद्वसन्तकाले । तदनन्तरोऽयं ग्रीष्मर्तुः पूर्वोक्तकर्मणामवसानेऽनुभूयमानः विरामकाल इव । पूर्वाषाढा-उत्तराषाढयोर्नक्षत्रयोस्संयोगेन रञ्जिता भवति पौर्णमासी इदानीम् । प्रायशः जून्-जूलै मासयोर्मध्यवर्ती भवति । इतः परं वर्षर्तौ प्रारप्स्यमानस्य कृषिकर्मणः (वाणिज्यस्य च) यावदपेक्षितमुत्साहवर्धनायेव मध्ये किंचिद्विश्रान्तिरनुभूयते कार्मिकैः ।

अत एव विवाहमण्डपाधिकृतानां, पुरोहितवर्गाणां, सूपकारादीनां च वदनेषु ग्लानिः प्रतिस्फुरति । न तावान् उत्साहः अद्य, यावानासीत् पूर्वतने वसन्तर्तौ । आदायवार्तायाः इदानीं मात्रयाप्यभावात् । आषाढमासस्यान्तिमपक्षे मेघाः (प्रवर्तका इव) सज्जा भवन्ति । कृषकानुत्तेजयितुं इतस्ततस्सञ्चरन्ति मेघाः । यथा कालिदासः सूचयति- 'आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगज-प्रेक्षणीयं ददर्श' - इति । महाविष्णुरपि सततोद्योगशीलः,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लोकानां योगक्षेमनिर्वाहकोऽपि सन् श्रान्त इव स्वपिति अस्मिन् मासे । 'शेते विष्णुः सदाऽऽषाढे कार्तिके प्रतिबोध्यते (विष्णुपुराणे) ।

यद्यप्येवं, 'शून्यमास' इति कश्चनापवादः अस्य मासस्य संसूच्यते, ततश्च विवाहादिमङ्गलकर्माण्यपि प्रतिरुध्यन्ते । वस्तुतः तथा न भवितुमर्हति, यतस्सततमवहितदेवकर्मणां भारत-जनानामस्मिन्नपि मासे सत्कर्माणि प्रवर्तन्त एव । देव्युपासकाः श्रीचक्रपूजां यथाऽस्मिन् मासेऽनुतिष्ठन्ति तथैव वेदशास्त्राध्येतारः 'गुरुपूर्णिमेति वेदव्यासादिगुरुमण्डलसमर्चकाः सम्पद्यन्ते । केरलेषु विशिष्य प्रत्येकं गृहेषु 'भगवतीसेवां दुर्गासप्तशतीपारायण-त्रिकालपूजादिनानाविधक्रमैः संभरन्ति । सामान्यजना अपि तत्रत्याः 'रामायणमास' इति प्रथां अस्य कालस्य मानयन्तः अध्यात्मरामायण-श्रीमद्वाल्मीकि-रामायणादिपारायणपराः आधोषयन्ति । किं बहुना, कुट्टिमेषु, कुहरेषु, देवालयेषु, गृहाङ्गणेषु, पल्लीषु, प्रासादेषु च सर्वत्र श्रीरामायणपारायणं प्रवर्तत एव । संस्कृतभाषाज्ञानविहीना अपि 'स्वदेश' भाषामयं एषुत्तच्चन्' रामायणं सुस्वरं गायन्ति । आहत्य, मलयालराज्यं समग्रं अतिशुचि- वेषभषादिकमासेव्य, श्रीसीतालक्ष्मणभरतशत्रुघ्नादि सहित श्रीराम मण्डलचित्रं प्रतिष्ठाप्य, श्रीरामं षोडशोपचारैः सम्पूज्य, ततः श्रीरामायणश्लोकान् रागमालिकया अतिमधुरं संगायत् परिदृश्यते । इत्यतः परं किमधिकं मासस्य माहात्म्यं भवितुमर्हति? 'मासानां मार्गशीर्षोऽस्मि' इति प्रतिबोधयतः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीमद्वासुदेवस्य तात्पर्यं, प्रतिमासं प्रतिपक्षं, प्रतिक्षणं च भगवत्कीर्तनमेवास्तु, नान्यत्किञ्चिदिति । 'तदेव लग्नं सुदिनं तदेव, ताराबलं चन्द्रबलं तदेव यस्मिन् श्रीलक्ष्मीपतेः अङ्घ्रियुगं स्मरामि' इत्येव खलु स्मरन्ति, स्मारयन्ति चास्मद्भारतीयाः ।

विशिष्टमन्यन्माहात्म्यं चास्य मासस्य 'व्यासपूर्णिमा गुरुपूर्णिमा इति गुरुपरम्परास्मरणायैकस्सुवर्णावसरः इति हेतोर्भवति । श्रीवेदव्यासस्य तथाऽन्येषां गुरूणां च पूजाः श्रीमठेषु साघोषमाद्रियन्ते । दिनादस्मादेव चातुर्मास्यव्रतमारभ्यते । 'पक्षो वै मासः' इत्युक्तरीत्या चतुष्पक्षात्मकं चातुर्मास्यं व्रतं मनसि सङ्कल्प्य, एकस्मिन्नेव प्रदेशे उषित्वा, मिताभ्यवहारक्रममूरीकृत्य, ब्रह्मविद्यानिरताः अत्यन्तशुद्धचित्ताश्च चकासति चास्मद्गुरुचरणा यतीश्वराः ।

किं च भूमेरन्तर्वर्तिनः कृमिकीटादयः वर्षाकाले भूतलोपरि इतस्ततस्सञ्चन्तः वर्तन्ते । 'न हिंस्यात्सर्वा भूतानि' इति, अहिंसा परमो धर्मः' इति च सनातनधर्मानुसारं यतीश्वरा स्वचलनमपि नियन्त्रयन्तः तीव्रव्रतानुष्ठानमेव समाचरन्ति ।

अतो व्यासं भगवन्तं, श्रीवाल्मीकिमहर्षिं, भगवत्पाद-श्रीशङ्कराचार्यान् च सादरं तेषामुत्कृष्टप्रतिभां च स्मारं स्मारं, तदुपदिष्टान् धर्मांश्च समाचरन्तः मासमिमं पुनीमहे । किं चास्माकं गुरुवर्याणां यतीश्वराणां चातुर्मास्यकाले आशीःपात्रताभवन मतिप्रशस्तं यत् तत् सम्पाद्य जीवितं सार्थकं कुर्वीमहि ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

किरातार्जुनीये प्रथमसर्गे त्रयस्त्रिंशः श्लोकः

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषा दरः ।।

पदच्छेदः – अवन्ध्यकोपस्य विहन्तुः आपदां भवन्ति वश्याः स्वयम् एव देहिनः अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषा दरः (१६ पदनि)

शब्दधातुरूपाणि–

अवन्ध्यकोपस्य	-कोपस्य कोपयोः कोपानां - अका.पु.ष. एक ।
विहन्तुः	- हन्तु; हन्त्रोः हन्तॄणां - ऋका.पुं.ष. एक ।
आपदां	- आपदः आपदोः आपदां -दका.स्त्री.ष.बहु।
भवन्ति	-भवति भवतः भवन्ति । 'भू सत्तायां' धातोः लटि प्र.पु. बहु ।
वश्याः	- वश्यः वश्यौ वश्याः -अका.पु.प्र.बहु. ।
देहिनः	-देहि देहिनौ देहिनः - नका.पुं.प्र.बहु ।
अमर्षशून्येन	-शून्येन शून्याभ्यां शून्यैः । अका.पुं.तृ.एक ।
जनस्य	- जनस्य जनयोः जनानां -अका.पु.ष.एक ।
जन्तुना	-जन्तुना जन्तुभ्यां जन्तुभिः-उका.पु.तृ.एक ।
जातहार्देन	- हार्देन हार्दाभ्यां हार्दैः-अका.पु.तृ.एक ।
विद्विषा	- द्विषा द्विड्भ्यां द्विड्भिः षका.पु.तृ. एक ।
दरः	-दरः दरौ पराः - अका.पु.प्र. एक ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रतिपदार्थः –

अवन्ध्यकोपस्य - நிச்சயமாய் பயனளிக்கும்கோப முடையவனும், आपदां -ஆபத்துக்களை, निहन्तुः - அழிக்கின்றவனுமான, மனிதனுக்கு, देहिनः - மனிதர்கள், स्वयमेव - தாமே, वश्याः - வசத்தில் இருப்பவர்களாய், भवन्ति - ஆகிறார்கள். अमर्षशून्येन - கோபமற்ற, जन्तुना - மனிதனால், (அவன் கோபமற்றவன் என்பதால்) जातहार्देन (सता) - (அவன் அன்புடையவனாயினும், जनस्य - மனிதர்களுக்கு, आदरः - (அவனிடம்) அன்பு, न - உண்டாவதில்லை; विद्विषा (सता) - அவன் பகைவனாயினும், दरः - பயம் (கோபமற்றவன் ஆதலால்), न - உண்டாவதில்லை.

व्याकरणविशेषः -

अवन्ध्यकोपस्य -न वन्ध्यः अवन्ध्यः । अवन्ध्यः कोपः यस्य सः अवन्ध्यकोपः - तस्य ।

अमर्षशून्येन -न मर्षः अमर्षः । तेन शून्यः अमर्षशून्यः तेन ।

जातहार्देन -हृदस्य कर्म हार्दं । जातं हार्दं यस्य स जातहार्दः । तेन ।

भावार्थः - यस्य कोपः निग्रहं करोति, प्रसादश्च अनुग्रहं तादृशस्य सर्वाः प्रजाः प्रीत्या भीत्या च वशंवदा भवेयुः । परं, यस्य कोपस्तु निष्फलः द्विषतोऽपि तस्मात् जनाः भीतिं न लभेरन् । यस्य कोपः वन्ध्यः तेन विपत्प्रतीकाररूपः अनुग्रहोऽपि न क्रियेत । यतोहि; असौ वन्ध्यकोपः ततो हेतोः अनुरागं प्रदर्शयत्यपि अस्मिन् प्रीतिं न भजेयुः । अतः प्रीतिभीत्योः उत्पादनाय कोपस्त्वावश्यक एव ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

High Energy Batteries (India) Limited
(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
Regd. Office:
Eswari House, Perungudi, Chennai - 600 096

With best Compliments

SRI S.V. PARASURAMAN
(Proprietor)

RAM ENTERPRISES
Mylapore, Chennai - 4
Dealer :

Hindustan Petrolium Corporation Ltd.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai
Date of Publication : 10th of every month
REGISTERED Registration No. TN / CC (S) DN / 443 / 15 - 17
TN / PMG (CCR) / WPP 696 / 15 - 17
Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

With best compliments from :

LITEROOF

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

NEW TUF-10 SER

(Janatha - Deluxe - Expodel Expo - 10

LITEROOF

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

LITEROOF

FOR

*Factories - Theatres * Schools * Housing * Poultry * Dairy Farms etc.,

LR

LIGHT ROOFINGS LIMITED

No. 35, 7th Street, V.S.I. Estate Phase II,
Thiruvanmiyur, Chennai - 600 041
Phone : 2454 4949 * 2454 4950

Printed by : Zigma Graphics, 9/1, Thirtharappan Street, Triplicane-5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)
Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,